# ॥ श्री गङ्गा सहस्रनाम स्तोत्रम् ॥
# Śrī Gaṅgā Sahasranāma Stotram

अगस्त्य उवाच ।

**agastya uvāca |**

विना स्नानेन गङ्गायां नृणां जन्म निरर्थकम् ।

**vinā snānena gaṅgāyāṁ nṛṇāṁ janma nirarthakam |**

उपायान्तरमस्त्यन्यद् येन स्नानफलं लभेत् ॥ १ ॥

**upāyāntaramastyanyad yena snānaphalaṁ labhet || 1||**

अशक्तानां च पङ्गूनामालस्योपहतात्मनाम् ।

**aśaktānāṁ ca paṅgūnāmālasyopahatātmanām |**

दूरदेशान्तरस्थानां गङ्गास्नानं कथं भवेत् ॥ २ ॥

**dūradeśāntarasthānāṁ gaṅgāsnānaṁ kathaṁ bhavet || 2||**

दानं वाऽथ व्रतं वाथ मन्त्रः स्तोत्रं जपोऽथवा ।

**dānaṁ vā'tha vrataṁ vātha mantraḥ stotraṁ japo'thavā |**

तीर्थान्तराभिषेको वा देवतोपासनं तु वा ॥ ३ ॥

**tīrthāntarābhiṣeko vā devatopāsanaṁ tu vā || 3||**

**यद्यस्ति किञ्चित् षड्वक्त्र गङ्गास्नानफलप्रदम् ।**

**yadyasti kiñcit ṣaḍvaktra gaṅgāsnānaphalapradam |**

**विधानान्तरमात्रेण तद् वद प्रणताय मे ॥ ४ ॥**

**vidhānāntaramātreṇa tad vada praṇatāya me || 4||**

**त्वत्तो न वेद स्कन्दान्यो गङ्गागर्भसमुद्भव ।**

**tvatto na veda skandānyo gaṅgāgarbhasamudbhava |**

**परं स्वर्गतरङ्गिण्यां महिमानं महामते ॥ ५ ॥**

**paraṁ svargataraṅgiṇyāṁ mahimānaṁ mahāmate || 5||**

**स्कन्द उवाच ।**

**skanda uvāca |**

**सन्ति पुण्यजलानीह सरांसि सरितो मुने ।**

**santi puṇyajalānīha sarāṁsi sarito mune |**

**स्थाने स्थाने च तीर्थानि जितात्माध्युषितानि च ॥ ६ ॥**

**sthāne sthāne ca tīrthāni jitātmādhyuṣitāni ca || 6||**

**दृष्टप्रत्ययकारीणि महामहिमभाञ्ज्यपि ।**

**dṛṣṭapratyayakārīṇi mahāmahimabhāñjyapi |**

**परं स्वर्गतरङ्गिण्याः कोट्यंशोऽपि न तत्र वै ॥ ७ ॥**

**paraṁ svargataraṅgiṇyāḥ koṭyaṁśo'pi na tatra vai || 7||**

अनेनैवानुमानेन बुद्ध्यस्व कलशोद्भव ।
**anenaivānumānena buddhyasva kalaśodbhava |**
दध्रे गङ्गोत्तमाङ्गेन देवदेवेन शम्भुना ॥ ८ ॥
**dadhre gaṅgottamāṅgena devadevena śambhunā || 8||**

स्नानकालेऽन्यतीर्थेषु जप्यते जाह्नवी जनैः ।
**snānakāle'nyatīrtheṣu japyate jāhnavī janaiḥ |**
विना विष्णुपदीं क्वान्यत् समर्थमघमोचने ॥ ९ ॥
**vinā viṣṇupadīṁ kvānyat samarthamaghamocane || 9||**

गङ्गास्नानफलं ब्रह्मन् गङ्गायामेव लभ्यते ।
**gaṅgāsnānaphalaṁ brahman gaṅgāyāmeva labhyate |**
यथा द्राक्षाफलस्वादो द्राक्षायामेव नान्यतः ॥ १० ॥
**yathā drākṣāphalasvādo drākṣāyāmeva nānyataḥ || 10||**

अस्त्युपाय इह त्वेकः स्याद् येनाविकलं फलम् ।
**astyupāya iha tvekaḥ syād yenāvikalaṁ phalam |**
स्नानस्य देवसरितो महागुह्यतमो मुने ॥ ११ ॥
**snānasya devasarito mahāguhyatamo mune || 11||**

शिवभक्ताय शान्ताय विष्णुभक्तिपराय च ।
**śivabhaktāya śāntāya viṣṇubhaktiparāya ca |**
श्रद्धालवे त्वास्तिकाय गर्भवासमुमुक्षवे ॥ १२ ॥
**śraddhālave tvāstikāya garbhavāsamumukṣave || 12||**

कथनीयं न चान्यस्य कस्यचित् केनचित् क्वचित् ।

**kathanīyaṁ na cānyasya kasyacit kenacit kvacit |**

इदं रहस्यं परमं महापातकनाशनम् ॥ १३ ॥

**idaṁ rahasyaṁ paramaṁ mahāpātakanāśanam || 13||**

महाश्रेयस्करं पुण्यं मनोरथकरं परम् ।

**mahāśreyaskaraṁ puṇyaṁ manorathakaraṁ param |**

द्युनदीप्रीतिजनकं शिवसन्तोषसंततिः ॥ १४ ॥

**dyunadīprītijanakaṁ śivasantoṣasaṁtatiḥ || 14||**

नाम्नां सहस्रं गङ्गायाः स्तवराजेषु शोभनम् ।

**nāmnāṁ sahasraṁ gaṅgāyāḥ stavarājeṣu śobhanam |**

जप्यानां परमं जप्यं वेदोपनिषदां समम् ॥ १५ ॥

**japyānāṁ paramaṁ japyaṁ vedopaniṣadāṁ samam || 15||**

जपनीयं प्रयत्नेन मौनिना वाचकं विना ।

**japanīyaṁ prayatnena mauninā vācakaṁ vinā |**

शुचिस्थानेषु शुचिना सुस्पष्टाक्षरमेव च ॥ १६ ॥

**śucisthāneṣu śucinā suspaṣṭākṣarameva ca || 16||**

# ध्यानम्

## dhyānam

शैलेन्द्रादवतारिणी निजजले मज्जद्जनोत्तारिणी

**śailendrādavatāriṇī nijajale majjadjanottāriṇī**

पारावारविहारिणी भवभयश्रेणी समुत्सारिणी ।

**pārāvāravihāriṇī bhavabhayaśreṇī samutsāriṇī |**

शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी

**śeṣāheranukāriṇī haraśirovallīdalākāriṇī**

काशीप्रान्तविहारिणी विजयते गङ्गा मनोहारिणी ॥

**kāśīprāntavihāriṇī vijayate gaṅgā manohāriṇī ||**

## ॥ ॐ नमो गङ्गादेव्यै ॥

**|| om namo gaṅgādevyai ||**

स्कन्द उवाच ।

**skanda uvāca |**

ओंकाररूपिण्यजराऽतुलाऽनन्ताऽमृतस्रवा ।

**oṅkārarūpiṇyajarā'tulā'nantā'mṛtasravā |**

अत्युदाराऽभयाऽशोकाऽलकनन्दाऽमृताऽमला ॥ १७ ॥

**atyudārā'bhayā'śokā'lakanandā'mṛtā'malā || 17||**

अनाथवत्सलाऽमोघाऽपांयोनिरमृतप्रदा ।

**anāthavatsalā'moghā'pāṁyoniramṛtapradā |**

अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराऽजिता ॥ १८ ॥

**avyaktalakṣaṇā'kṣobhyā'navacchinnā'parā'jitā || 18||**

अनाथनाथाऽभीष्टार्थसिद्धिदाऽनङ्गवर्धिनी ।

**anāthanāthā'bhīṣṭārthasiddhidā'naṅgavardhinī |**

अणिमादिगुणाऽधाराऽग्रगण्याऽलीकहारिणी ॥ १९ ॥

**aṇimādiguṇā'dhārā'gragaṇyā'līkahāriṇī || 19||**

अचिन्त्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी ।

**acintyaśaktiranaghā'dbhutarūpā'ghahāriṇī |**

अद्रिराजसुताऽष्टाङ्गयोगसिद्धिप्रदाऽच्युता ॥ २० ॥

**adrirājasutā'ṣṭāṅgayogasiddhipradā'cyutā || 20||**

अक्षुण्णशक्तिरसुदाऽनन्ततीर्थाऽमृतोदका ।

**akṣuṇṇaśaktirasudā'nantatīrthā'mṛtodakā |**

अनन्तमहिमाऽपाराऽनन्तसौख्यप्रदाऽन्नदा ॥ २१ ॥

**anantamahimā'pārā'nantasaukhyapradā'nnadā || 21||**

अशेषदेवतामूर्तिरघोराऽमृतरूपिणी ।

**aśeṣadevatāmūrtiraghorā'mṛtarūpiṇī |**

अविद्याजालशमनी ह्यप्रतर्क्यगतिप्रदा ॥ २२ ॥

**avidyājālaśamanī hyapratarkyagatipradā || 22||**

अशेषविघ्नसंहर्त्री त्वशेषगुणगुम्फिता ।

**aśeṣavighnasaṁhartrī tvaśeṣaguṇagumphitā |**

अज्ञानतिमिरज्योतिरनुग्रहपरायणा ॥ २३ ॥

**ajñānatimirajyotiranugrahaparāyaṇā || 23||**

अभिरामाऽनवद्याङ्ग्यनन्तसाराऽकलङ्किनी ।

**abhirāmā'navadyāṅgyanantasārā'kalaṅkinī |**

आरोग्यदाऽऽनन्दवल्ली त्वापन्नार्तिविनाशिनी ॥ २४ ॥

**ārogyadā''nandavallī tvāpannārtivināśinī || 24||**

आश्चर्यमूर्तिरायुष्या ह्याढ्याऽऽद्याऽऽप्राऽऽर्यसेविता ।

**āścaryamūrtirāyuṣyā hyāḍhyā''dyā''prā''ryasevitā |**

आप्यायिन्याप्तविद्याख्या त्वानन्दाऽऽश्वासदायिनी ॥ २५ ॥

**āpyāyinyāptavidyākhyā tvānandā''śvāsadāyinī || 25||**

आलस्यघ्न्यापदां हन्त्री ह्यानन्दामृतवर्षिणी ।

**ālasyaghnyāpadāṁ hantrī hyānandāmṛtavarṣiṇī |**

इरावतीष्टदात्रीष्टा त्विष्टापूर्तफलप्रदा ॥ २६ ॥

**irāvatīṣṭadātrīṣṭā tviṣṭāpūrtaphalapradā || 26||**

इतिहासश्रुतीड्यार्था त्विहामुत्रशुभप्रदा ।

**itihāsaśrutīḍyārthā tvihāmutraśubhapradā |**

इज्याशीलसमिज्येष्ठा त्विन्द्रादिपरिवन्दिता ॥ २७ ॥

**ijyāśīlasamijyeṣṭhā tvindrādiparivanditā || 27||**

इलालङ्कारमालेद्धा त्विन्दिरारम्यमन्दिरा ।

**ilālaṅkāramāleddhā tvindirāramyamandirā |**

इन्द्रेन्दिरादिसंसेव्या त्वीश्वरीश्वरवल्लभा ॥ २८ ॥

**indrendirādisaṁsevyā tvīśvarīśvaravallabhā || 28||**

ईतिभीतिहरेड्या च त्वीडनीयचरित्रभृत् ।

**ītibhītihareḍyā ca tvīḍanīyacaritrabhṛt |**

उत्कृष्टशक्तिरुत्कृष्टोडुपमण्डलचारिणी ॥ २९ ॥

**utkṛṣṭaśaktirutkṛṣṭoḍupamaṇḍalacāriṇī || 29||**

उदिताम्बरमार्गोस्त्रोरगलोकविहारिणी ।

**uditāmbaramārgosroragalokavihāriṇī |**

उक्षोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥ ३० ॥

**ukṣorvarotpalotkumbhā upendracaraṇadravā || 30||**

उदन्वत्पूर्तिहेतुश्चोदारोत्साहप्रवर्धिनी ।

**udanvatpūrtihetuścodārotsāhapravardhinī |**

उद्वेगघ्न्युष्णशमनी ह्युष्णरश्मिसुताप्रिया ॥ ३१ ॥

**udvegaghnyuṣṇaśamanī hyuṣṇaraśmisutāpriyā || 31||**

उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी ।

**utpattisthitisaṁhārakāriṇyuparicāriṇī |**

ऊर्जं वहन्त्यूर्जधरोर्जावती चोर्मिमालिनी ॥ ३२ ॥

**ūrjaṁ vahantyūrjadharorjāvatī cormimālinī || 32||**

ऊर्ध्वरेतःप्रियोर्ध्वाध्वा ह्यूर्मिलोर्ध्वगतिप्रदा ।

**ūrdhvaretaḥpriyordhvādhvā hyūrmilordhvagatipradā |**

ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी ॥ ३३ ॥

**ṛṣivṛndastutarddhiśca ṛṇatrayavināśinī || 33||**

ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया ।

**ṛtambhararddhidātrī ca ṛksvarūpā ṛjupriyā |**

ऋक्षमार्गवहर्क्षार्चिरृजुमार्गप्रदर्शिनी ॥ ३४ ॥

**ṛkṣamārgavaharkṣārcirṛjumārgapradarśinī || 34||**

एधिताखिलधर्मार्था त्वेकैकामृतदायिनी ।

**edhitākhiladharmārthā tvekaikāmṛtadāyinī |**

एधनीयस्वभावैज्या त्वेजिताशेषपातका ॥ ३५ ॥

**edhanīyasvabhāvaijyā tvejitāśeṣapātakā || 35||**

ऐश्वर्यदैश्वर्यरूपा ह्यैतिह्यं ह्यैन्दवीद्युतिः ।

**aiśvaryadaiśvaryarūpā hyaitihyaṁ hyaindavīdyutiḥ |**

ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ॥ ३६ ॥

**ojasvinyoṣadhīkṣetramojodaudanadāyinī || 36||**

ओष्ठामृतौन्नत्यदात्री त्वौषधम्भवरोगिणाम् ।

**oṣṭhāmṛtaunnatyadātrī tvauṣadhambhavarogiṇām |**

औदार्यचञ्चुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी ॥ ३७ ॥

**audāryacañcuraupendrī tvaugrī hyaumeyarūpiṇī || 37||**

अम्बराध्ववहाम्बष्ठाम्बरमालाम्बुजेक्षणा ।

**ambarādhvavahāmbaṣṭhāmbaramālāmbujekṣaṇā |**

अम्बिकाम्बुमहायोनिरन्धोदान्धकहारिणी ॥ ३८ ॥

**ambikāmbumahāyonirandhodāndhakahāriṇī || 38||**

अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना ।

**aṁśumālā hyaṁśumatī tvaṅgīkṛtaṣaḍānanā |**

अन्धतामिस्रहन्त्र्यन्धुरञ्जना ह्यञ्जनावती ॥ ३९ ॥

**andhatāmisrahantryandhurañjanā hyañjanāvatī || 39||**

कल्याणकारिणी काम्या कमलोत्पलगन्धिनी ।

**kalyāṇakāriṇī kāmyā kamalotpalagandhinī |**

कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी ॥ ४० ॥

**kumudvatī kamalinī kāntiḥ kalpitadāyinī || 40||**

काञ्चनाक्षी कामधेनुः कीर्तिकृत् क्लेशनाशिनी ।

**kāñcanākṣī kāmadhenuḥ kīrtikṛt kleśanāśinī ।**

क्रतुश्रेष्ठा क्रतुफला कर्मबन्धविभेदिनी ॥ ४१ ॥

**kratuśreṣṭhā kratuphalā karmabandhavibhedinī ।। 41।।**

कमलाक्षी क्लमहरा कृशानुतपनद्युतिः ।

**kamalākṣī klamaharā kṛśānutapanadyutiḥ ।**

करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ॥ ४२ ॥

**karuṇārdrā ca kalyāṇī kalikalmaṣanāśinī ।। 42।।**

कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी ।

**kāmarūpā kriyāśaktiḥ kamalotpalamālinī ।**

कूटस्था करुणा कान्ता कूर्मयाना कलावती ॥ ४३ ॥

**kūṭasthā karuṇā kāntā kūrmayānā kalāvatī ।। 43।।**

कमला कल्पलतिका काली कलुषवैरिणी ।

**kamalā kalpalatikā kālī kaluṣavairiṇī ।**

कमनीयजला कम्रा कपर्दिसुकपर्दगा ॥ ४४ ॥

**kamanīyajalā kamrā kapardisukapardagā ।। 44।।**

कालकूटप्रशमनी कदम्बकुसुमप्रिया ।

**kālakūṭapraśamanī kadambakusumapriyā ।**

कालिन्दी केलिललिता कलकल्लोलमालिका ॥ ४५ ॥

**kālindī kelilalitā kalakallolamālikā ।। 45।।**

क्रान्तलोकत्रया कण्डूः कण्डूतनयवत्सला ।

**krāntalokatrayā kaṇḍūḥ kaṇḍūtanayavatsalā |**

खड्गिनी खड्गधाराभा खगा खण्डेन्दुधारिणी ॥ ४६ ॥

**khaḍginī khaḍgadhārābhā khagā khaṇḍendudhāriṇī || 46||**

खेखेलगामिनी खस्था खण्डेन्दुतिलकप्रिया ।

**khekhelagāminī khasthā khaṇḍendutilakapriyā |**

खेचरी खेचरीवन्द्या ख्यातिः ख्यातिप्रदायिनी ॥ ४७ ॥

**khecarī khecarīvandyā khyātiḥ khyātipradāyinī || 47||**

खण्डितप्रणताघौघा खलबुद्धिविनाशिनी ।

**khaṇḍitapraṇatāghaughā khalabuddhivināśinī |**

खातैनः कन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ॥ ४८ ॥

**khātainaḥ kandasandohā khaḍgakhaṭvāṅgakheṭinī || 48||**

खरसन्तापशमनी खनिः पीयूषपाथसाम् ।

**kharasantāpaśamanī khaniḥ pīyūṣapāthasām |**

गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ॥ ४९ ॥

**gaṅgā gandhavatī gaurī gandharvanagarapriyā || 49||**

गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया ।

**gambhīrāṅgī guṇamayī gatātaṅkā gatipriyā |**

गणनाथाम्बिका गीता गद्यपद्यपरिष्टुता ॥ ५० ॥

**gaṇanāthāmbikā gītā gadyapadyapariṣṭutā || 50||**

गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा ।

**gāndhārī garbhaśamanī gatibhraṣṭagatipradā |**

गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी ॥ ५१ ॥

**gomatī guhyavidyā gaurgoptrī gaganagāminī || 51||**

गोत्रप्रवर्धिनी गुण्या गुणातीता गुणाग्रणीः ।

**gotrapravardhinī guṇyā guṇātītā guṇāgraṇīḥ |**

गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा ॥ ५२ ॥

**guhāmbikā girisutā govindāṅghrisamudbhavā || 52||**

गुणनीयचरित्रा च गायत्री गिरिशप्रिया ।

**guṇanīyacaritrā ca gāyatrī giriśapriyā |**

गूढरूपा गुणवती गुर्वी गौरववर्धिनी ॥ ५३ ॥

**gūḍharūpā guṇavatī gurvī gauravavardhinī || 53||**

ग्रहपीडाहरा गुन्द्रा गरघ्नी गानवत्सला ।

**grahapīḍāharā gundrā garaghnī gānavatsalā |**

घर्महन्त्री घृतवती घृततुष्टिप्रदायिनी ॥ ५४ ॥

**gharmahantrī ghṛtavatī ghṛtatuṣṭipradāyinī || 54||**

घण्टारवप्रिया घोराघौघविध्वंसकारिणी ।

**ghaṇṭāravapriyā ghorāghaughavidhvaṁsakāriṇī |**

घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ॥ ५५ ॥

**ghrāṇatuṣṭikarī ghoṣā ghanānandā ghanapriyā || 55||**

घातुका घूर्णितजला घृष्टपातकसंततिः ।

**ghātukā ghūrṇitajalā ghṛṣṭapātakasaṁtatiḥ |**

घटकोटिप्रपीतापा घटिताशेषमङ्गला ॥ ५६ ॥

**ghaṭakoṭiprapītāpā ghaṭitāśeṣamaṅgalā || 56||**

घृणावती घृणनिधिर्घस्मरा घूकनादिनी ।

**ghṛṇāvatī ghṛṇanidhirghasmarā ghūkanādinī |**

घुसृणापिञ्जरतनुर्घर्घरा घर्घरस्वना ॥ ५७ ॥

**ghusṛṇāpiñjaratanurghargharā ghargharasvanā || 57||**

चन्द्रिका चन्द्रकान्ताम्बुश्चञ्चदापा चलद्युतिः ।

**candrikā candrakāntāmbuścañcadāpā caladyutiḥ |**

चिन्मयी चितिरूपा च चन्द्रायुतशतानना ॥ ५८ ॥

**cinmayī citirūpā ca candrāyutaśatānanā || 58||**

चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी ।

**cāmpeyalocanā cāruścārvaṅgī cārugāminī |**

चार्या चारित्रनिलया चित्रकृच्चित्ररूपिणी ॥ ५९ ॥

**cāryā cāritranilayā citrakṛccitrarūpiṇī || 59||**

चम्पूश्चन्दनशुच्यम्बुश्चर्चनीया चिरस्थिरा ।

**campūścandanaśucyambuścarcanīyā cirasthirā |**

चारुचम्पकमालाढ्या चमिताशेषदुष्कृता ॥ ६० ॥

**cārucampakamālāḍhyā camitāśeṣaduṣkṛtā || 60||**

चिदाकाशवहा चिन्त्या चञ्चच्चामरवीजिता ।

**cidākāśavahā cintyā cañcaccāmaravījitā |**

चोरिताशेषवृजिना चरिताशेषमण्डला ॥ ६१ ॥

**coritāśeṣavṛjinā caritāśeṣamaṇḍalā || 61||**

छेदिताखिलपापौघा छद्मघ्नी छलहारिणी ।

**cheditākhilapāpaughā chadmaghnī chalahāriṇī |**

छन्नत्रिविष्टपतला छोटिताशेषबन्धना ॥ ६२ ॥

**channatriviṣṭapatalā choṭitāśeṣabandhanā || 62||**

छुरितामृतधारौघा छिन्नैनाश्छन्दगामिनी ।

**churitāmṛtadhāraughā chinnaināśchandagāminī |**

छत्रीकृतमरालौघा छटीकृतनिजामृता ॥ ६३ ॥

**chatrīkṛtamarālaughā chaṭīkṛtanijāmṛtā || 63||**

जाह्नवी ज्या जगन्माता जप्या जङ्घालवीचिका ।

**jāhnavī jyā jaganmātā japyā jaṅghālavīcikā |**

जया जनार्दनप्रीता जुषणीया जगद्धिता ॥ ६४ ॥

**jayā janārdanaprītā juṣaṇīyā jagaddhitā || 64||**

जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी ।

**jīvanaṁ jīvanaprāṇā jagajjyeṣṭhā jaganmayī |**

जीवजीवातुलतिका जन्मिजन्मनिबर्हिणी ॥ ६५ ॥

**jīvajīvātulatikā janmijanmanibarhiṇī || 65||**

जाड्यविध्वंसनकरी जगद्योनिर्जलाविला ।

**jāḍyavidhvaṁsanakarī jagadyonirjalāvilā |**

जगदानन्दजननी जलजा जलजेक्षणा ॥ ६६ ॥

**jagadānandajananī jalajā jalajekṣaṇā || 66||**

जनलोचनपीयूषा जटातटविहारिणी ।

**janalocanapīyūṣā jaṭātaṭavihāriṇī |**

जयन्ती जञ्जपूकघ्नी जनितज्ञानविग्रहा ॥ ६७ ॥

**jayantī jañjapūkaghnī janitajñānavigrahā || 67||**

झल्लरीवाद्यकुशला झलज्झालजलावृता ।

**jhallarīvādyakuśalā jhalajjhālajalāvṛtā |**

झिण्टीशवन्द्या झङ्कारकारिणी झर्झरावती ॥ ६८ ॥

**jhiṇṭīśavandyā jhaṅkārakāriṇī jharjharāvatī || 68||**

टीकिताशेषपाताला टङ्किकैनोद्रिपाटने ।

**ṭīkitāśeṣapātālā ṭaṅkikainodripāṭane |**

टङ्कारनृत्यत्कल्लोला टीकनीयमहातटा ॥ ६९ ॥

**ṭaṅkāranṛtyatkallolā ṭīkanīyamahātaṭā || 69||**

डम्बरप्रवहा डीनराजहंसकुलाकुला ।

**ḍambarapravahā ḍīnarājahaṁsakulākulā |**

डमड्डमरुहस्ता च डामरोक्तमहाण्डका ॥ ७० ॥

**ḍamaḍḍamaruhastā ca ḍāmaroktamahāṇḍakā || 70||**

ढौकिताशेषनिर्वाणा ढक्कानादचलज्जला ।
ḍhaukitāśeṣanirvāṇā ḍhakkānādacalajjalā ।
ढुण्ढिविघ्नेशजननी ढणड्ढुणितपातका ॥ ७१ ॥
ḍhuṇḍhivighneśajananī ḍhaṇaḍḍhuṇitapātakā ।। 71।।

तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ।
tarpaṇī tīrthatīrthā ca tripathā tridaśeśvarī ।
त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ॥ ७२ ॥
trilokagoptrī toyeśī trailokyaparivanditā ।। 72।।

तापत्रितयसंहर्त्री तेजोबलविवर्धिनी ।
tāpatritayasaṁhartrī tejobalavivardhinī ।
त्रिलक्ष्या तारणी तारा तारापतिकरार्चिता ॥ ७३ ॥
trilakṣyā tāraṇī tārā tārāpatikarārcitā ।। 73।।

त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी ।
trailokyapāvanī puṇyā tuṣṭidā tuṣṭirūpiṇī ।
तृष्णाछेत्री तीर्थमाता त्रिविक्रमपदोद्भवा ॥ ७४ ॥
tṛṣṇāchetrī tīrthamātā trivikramapadodbhavā ।। 74।।

तपोमयी तपोरूपा तपःस्तोमफलप्रदा ।
tapomayī taporūpā tapaḥstomaphalapradā ।
त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ॥ ७५ ॥
trailokyavyāpinī tṛptistṛptikṛttattvarūpiṇī ।। 75।।

त्रैलोक्यसुन्दरी तुर्या तुर्यातीतपदप्रदा ।

**trailokyasundarī turyā turyātītapadapradā |**

त्रैलोक्यलक्ष्मीस्त्रिपदी तथ्या तिमिरचन्द्रिका ॥ ७६ ॥

**trailokyalakṣmīstripadī tathyā timiracandrikā || 76||**

तेजोगर्भा तपःसारा त्रिपुरारिशिरोगृहा ।

**tejogarbhā tapaḥsārā tripurāriśirogṛhā |**

त्रयीस्वरूपिणी तन्वी तपनाङ्गजभीतिनुत् ॥ ७७ ॥

**trayīsvarūpiṇī tanvī tapanāṅgajabhītinut || 77||**

तरिस्तरणिजामित्रं तर्पिताशेषपूर्वजा ।

**taristaraṇijāmitraṁ tarpitāśeṣapūrvajā |**

तुलाविरहिता तीव्रपापतूलतनूनपात् ॥ ७८ ॥

**tulāvirahitā tīvrapāpatūlatanūnapāt || 78||**

दारिद्र्यदमनी दक्षा दुष्प्रेक्षा दिव्यमण्डना ।

**dāridryadamanī dakṣā duṣprekṣā divyamaṇḍanā |**

दीक्षावती दुरावाप्या द्राक्षामधुरवारिभृत् ॥ ७९ ॥

**dīkṣāvatī durāvāpyā drākṣāmadhuravāribhṛt || 79||**

दर्शितानेककुतुका दुष्टदुर्जयदुःखहृत् ।

**darśitānekakutukā duṣṭadurjayaduḥkhahṛt |**

दैन्यहृद्दुरितघ्नी च दानवारिपदाब्जजा ॥ ८० ॥

**dainyahṛdduritaghnī ca dānavāripadābjajā || 80||**

दन्दशूकविषघ्नी च दारिताघौघसंततिः ।
**dandaśūkaviṣaghnī ca dāritāghaughasaṁtatiḥ |**
द्रुता देवद्रुमच्छन्ना दुर्वाराघविघातिनी ॥ ८१ ॥
**drutā devadrumacchannā durvārāghavighātinī || 81||**

दमग्राह्या देवमाता देवलोकप्रदर्शिनी ।
**damagrāhyā devamātā devalokapradarśinī |**
देवदेवप्रिया देवी दिक्पालपददायिनी ॥ ८२ ॥
**devadevapriyā devī dikpālapadadāyinī || 82||**

दीर्घायुः कारिणी दीर्घा दोग्ध्री दूषणवर्जिता ।
**dīrghāyuḥ kāriṇī dīrghā dogdhrī dūṣaṇavarjitā |**
दुग्धाम्बुवाहिनी दोह्या दिव्या दिव्यगतिप्रदा ॥ ८३ ॥
**dugdhāmbuvāhinī dohyā divyā divyagatipradā || 83||**

द्युनदी दीनशरणं देहिदेहनिवारिणी ।
**dyunadī dīnaśaraṇaṁ dehidehanivāriṇī |**
द्राघीयसी दाघहन्त्री दितपातकसंततिः ॥ ८४ ॥
**drāghīyasī dāghahantrī ditapātakasaṁtatiḥ || 84||**

दूरदेशान्तरचरी दुर्गमा देववल्लभा ।
**dūradeśāntaracarī durgamā devavallabhā |**
दुर्वृत्तघ्नी दुर्विगाह्या दयाधारा दयावती ॥ ८५ ॥
**durvṛttaghnī durvigāhyā dayādhārā dayāvatī || 85||**

दुरासदा दानशीला द्राविणी द्रुहिणस्तुता ।

**durāsadā dānaśīlā drāviṇī druhiṇastutā |**

दैत्यदानवसंशुद्धिकर्त्री दुर्बुद्धिहारिणी ॥ ८६ ॥

**daityadānavasaṁśuddhikartrī durbuddhihāriṇī || 86||**

दानसारा दयासारा द्यावाभूमिविगाहिनी ।

**dānasārā dayāsārā dyāvābhūmivigāhinī |**

दृष्टादृष्टफलप्राप्तिर्देवतावृन्दवन्दिता ॥ ८७ ॥

**dṛṣṭādṛṣṭaphalaprāptirdevatāvṛndavanditā || 87||**

दीर्घव्रता दीर्घदृष्टिर्दीप्ततोया दुरालभा ।

**dīrghavratā dīrghadṛṣṭirdīptatoyā durālabhā |**

दण्डयित्री दण्डनीतिर्दुष्टदण्डधरार्चिता ॥ ८८ ॥

**daṇḍayitrī daṇḍanītirduṣṭadaṇḍadharārcitā || 88||**

दुरोदरघ्नी दावार्चिर्द्रवद्द्रव्यैकशेवधिः ।

**durodaraghnī dāvārcirdravaddravyaikaśevadhiḥ |**

दीनसंतापशमनी दात्री दवथुवैरिणी ॥ ८९ ॥

**dīnasantāpaśamanī dātrī davathuvairiṇī || 89||**

दरीविदारणपरा दान्ता दान्तजनप्रिया ।

**darīvidāraṇaparā dāntā dāntajanapriyā |**

दारिताद्रितटा दुर्गा दुर्गारण्यप्रचारिणी ॥ ९० ॥

**dāritādritaṭā durgā durgāraṇyapracāriṇī || 90||**

धर्मद्रवा धर्मधुरा धेनुर्धीरा धृतिर्ध्रुवा ।

**dharmadravā dharmadhurā dhenurdhīrā dhṛtirdhruvā |**

धेनुदानफलस्पर्शा धर्मकामार्थमोक्षदा ॥ ९१ ॥

**dhenudānaphalasparśā dharmakāmārthamokṣadā || 91||**

धर्मोर्मिवाहिनी धुर्या धात्री धात्रीविभूषणम् ।

**dharmormivāhinī dhuryā dhātrī dhātrīvibhūṣaṇam |**

धर्मिणी धर्मशीला च धन्विकोटिकृतावना ॥ ९२ ॥

**dharmiṇī dharmaśīlā ca dhanvikoṭikṛtāvanā || 92||**

ध्यातृपापहरा ध्येया धावनी धूतकल्मषा ।

**dhyātṛpāpaharā dhyeyā dhāvanī dhūtakalmaṣā |**

धर्मधारा धर्मसारा धनदा धनवर्धिनी ॥ ९३ ॥

**dharmadhārā dharmasārā dhanadā dhanavardhinī || 93||**

धर्माधर्मगुणच्छेत्री धत्तूरकुसुमप्रिया ।

**dharmādharmaguṇacchetrī dhattūrakusumapriyā |**

धर्मेशी धर्मशास्त्रज्ञा धनधान्यसमृद्धिकृत् ॥ ९४ ॥

**dharmeśī dharmaśāstrajñā dhanadhānyasamṛddhikṛt || 94||**

धर्मलभ्या धर्मजला धर्मप्रसवधर्मिणी ।

**dharmalabhyā dharmajalā dharmaprasavadharmiṇī |**

ध्यानगम्यस्वरूपा च धरणी धातृपूजिता ॥ ९५ ॥

**dhyānagamyasvarūpā ca dharaṇī dhātṛpūjitā || 95||**

धूर्धूर्जटिजटासंस्था धन्या धीर्धारणावती ।

**dhūrdhūrjaṭijaṭāsaṁsthā dhanyā dhīrdhāraṇāvatī |**

नन्दा निर्वाणजननी नन्दिनी नुन्नपातका ॥ ९६ ॥

**nandā nirvāṇajananī nandinī nunnapātakā || 96||**

निषिद्धविघ्ननिचया निजानन्दप्रकाशिनी ।

**niṣiddhavighnanicayā nijānandaprakāśinī |**

नभोङ्गणचरी नूतिर्नम्या नारायणी नुता ॥ ९७ ॥

**nabhoṅgaṇacarī nūtirnamyā nārāyaṇī nutā || 97||**

निर्मला निर्मलाख्याना नाशिनी तापसंपदाम् ।

**nirmalā nirmalākhyānā nāśinī tāpasampadām |**

नियता नित्यसुखदा नानाश्चर्यमहानिधिः ॥ ९८ ॥

**niyatā nityasukhadā nānāścaryamahānidhiḥ || 98||**

नदी नदसरोमाता नायिका नाकदीर्घिका ।

**nadī nadasaromātā nāyikā nākadīrghikā |**

नष्टोद्धरणधीरा च नन्दना नन्ददायिनी ॥ ९९ ॥

**naṣṭoddharaṇadhīrā ca nandanā nandadāyinī || 99||**

निर्णिक्ताशेषभुवना निःसङ्गा निरुपद्रवा ।

**nirṇiktāśeṣabhuvanā niḥsaṅgā nirupadravā |**

निरालम्बा निष्प्रपञ्चा निर्णाशितमहामला ॥ १०० ॥

**nirālambā niṣprapañcā nirṇāśitamahāmalā || 100||**

निर्मलज्ञानजननी निःशेषप्राणितापहृत् ।

**nirmalajñānajananī niḥśeṣaprāṇitāpahṛt |**

नित्योत्सवा नित्यतृप्ता नमस्कार्या निरञ्जना ॥ १०१ ॥

**nityotsavā nityatṛptā namaskāryā nirañjanā || 101||**

निष्ठावती निरातङ्का निर्लेपा निश्चलात्मिका ।

**niṣṭhāvatī nirātaṅkā nirlepā niścalātmikā |**

निरवद्या निरीहा च नीललोहितमूर्धगा ॥ १०२ ॥

**niravadyā nirīhā ca nīlalohitamūrdhagā || 102||**

नन्दिभृङ्गिगणस्तुत्या नागा नन्दा नगात्मजा ।

**nandibhṛṅgigaṇastutyā nāgā nandā nagātmajā |**

निष्प्रत्यूहा नाकनदी निरयार्णवदीर्घनौः ॥ १०३ ॥

**niṣpratyūhā nākanadī nirayārṇavadīrghanauḥ || 103||**

पुण्यप्रदा पुण्यगर्भा पुण्या पुण्यतरङ्गिणी ।

**puṇyapradā puṇyagarbhā puṇyā puṇyataraṅgiṇī |**

पृथुः पृथुफला पूर्णा प्रणतार्तिप्रभञ्जनी ॥ १०४ ॥

**pṛthuḥ pṛthuphalā pūrṇā praṇatārtiprabhañjanī || 104||**

प्राणदा प्राणिजननी प्राणेशी प्राणरूपिणी ।

**prāṇadā prāṇijananī prāṇeśī prāṇarūpiṇī |**

पद्मालया पराशक्तिः पुरजित्परमप्रिया ॥ १०५ ॥

**padmālayā parāśaktiḥ purajitparamapriyā || 105||**

परा परफलप्राप्तिः पावनी च पयस्विनी ।

**parā paraphalaprāptiḥ pāvanī ca payasvinī |**

परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥ १०६ ॥

**parānandā prakṛṣṭārthā pratiṣṭhā pālanī parā || 106||**

पुराणपठिता प्रीता प्रणवाक्षररूपिणी ।

**purāṇapaṭhitā prītā praṇavākṣararūpiṇī |**

पार्वती प्रेमसम्पन्ना पशुपाशविमोचनी ॥ १०७ ॥

**pārvatī premasampannā paśupāśavimocanī || 107||**

परमात्मस्वरूपा च परब्रह्मप्रकाशिनी ।

**paramātmasvarūpā ca parabrahmaprakāśinī |**

परमानन्दनिष्पन्दा प्रायश्चित्तस्वरूपिणी ॥ १०८ ॥

**paramānandaniṣpandā prāyaścittasvarūpiṇī || 108||**

पानीयरूपनिर्वाणा परित्राणपरायणा ।

**pānīyarūpanirvāṇā paritrāṇaparāyaṇā |**

पापेन्धनदवज्वाला पापारिः पापनामनुत् ॥ १०९ ॥

**pāpendhanadavajvālā pāpāriḥ pāpanāmanut || 109||**

परमैश्वर्यजननी प्रज्ञा प्राज्ञा परापरा ।

**paramaiśvaryajananī prajñā prājñā parāparā |**

प्रत्यक्षलक्ष्मीः पद्माक्षी परव्योमामृतस्रवा ॥ ११० ॥

**pratyakṣalakṣmīḥ padmākṣī paravyomāmṛtasravā || 110||**

प्रसन्नरूपा प्रणिधिः पूता प्रत्यक्षदेवता ।

**prasannarūpā praṇidhiḥ pūtā pratyakṣadevatā |**

पिनाकिपरमप्रीता परमेष्ठिकमण्डलुः ॥ १११ ॥

**pinākiparamaprītā parameṣṭhikamaṇḍaluḥ || 111||**

पद्मनाभपदार्घ्येण प्रसूता पद्ममालिनी ।

**padmanābhapadārghyeṇa prasūtā padmamālinī |**

परर्द्धिदा पुष्टिकरी पथ्या पूर्तिः प्रभावती ॥ ११२ ॥

**pararddhidā puṣṭikarī pathyā pūrtiḥ prabhāvatī || 112||**

पुनाना पीतगर्भघ्नी पापपर्वतनाशिनी ।

**punānā pītagarbhaghnī pāpaparvatanāśinī |**

फलिनी फलहस्ता च फुल्लाम्बुजविलोचना ॥ ११३ ॥

**phalinī phalahastā ca phullāmbujavilocanā || 113||**

फालितैनोमहाक्षेत्रा फणिलोकविभूषणम् ।

**phālitainomahākṣetrā phaṇilokavibhūṣaṇam |**

फेनच्छलप्रणुन्नैनाः फुल्लकैरवगन्धिनी ॥ ११४ ॥

**phenacchalapraṇunnaināḥ phullakairavagandhinī || 114||**

फेनिलाच्छाम्बुधाराभा फडुच्चाटितपातका ।

**phenilācchāmbudhārābhā phaḍuccāṭitapātakā |**

फाणितस्वादुसलिला फाण्टपथ्यजलाविला ॥ ११५ ॥

**phāṇitasvādusalilā phāṇṭapathyajalāvilā || 115||**

विश्वमाता च विश्वेशी विश्वा विश्वेश्वरप्रिया ।

**viśvamātā ca viśveśī viśvā viśveśvarapriyā |**

ब्रह्मण्या ब्रह्मकृद् ब्राह्मी ब्रह्मिष्ठा विमलोदका ॥ ११६ ॥

**brahmaṇyā brahmakṛd brāhmī brahmiṣṭhā vimalodakā || 116||**

विभावरी च विरजा विक्रान्तानेकविष्टपा ।

**vibhāvarī ca virajā vikrāntānekaviṣṭapā |**

विश्वमित्रं विष्णुपदी वैष्णवी वैष्णवप्रिया ॥ ११७ ॥

**viśvamitraṁ viṣṇupadī vaiṣṇavī vaiṣṇavapriyā || 117||**

विरूपाक्षप्रियकरी विभूतिर्विश्वतोमुखी ।

**virūpākṣapriyakarī vibhūtirviśvatomukhī |**

विपाशा वैबुधी वेद्या वेदाक्षररसस्रवा ॥ ११८ ॥

**vipāśā vaibudhī vedyā vedākṣararasasravā || 118||**

विद्या वेगवती वन्द्या बृंहणी ब्रह्मवादिनी ।

**vidyā vegavatī vandyā bṛṁhaṇī brahmavādinī |**

वरदा विप्रकृष्टा च वरिष्ठा च विशोधनी ॥ ११९ ॥

**varadā viprakṛṣṭā ca variṣṭhā ca viśodhanī || 119||**

विद्याधरी विशोका च वयोवृन्दनिषेविता ।

**vidyādharī viśokā ca vayovṛndaniṣevitā |**

बहूदका बलवती व्योमस्था विबुधप्रिया ॥ १२० ॥

**bahūdakā balavatī vyomasthā vibudhapriyā || 120||**

वाणी वेदवती वित्ता ब्रह्मविद्यातरङ्गिणी ।
**vāṇī vedavatī vittā brahmavidyātaraṅgiṇī ।**
ब्रह्माण्डकोटिव्याप्ताम्बुर्ब्रह्महत्यापहारिणी ॥ १२१ ॥
**brahmāṇḍakoṭivyāptāmburbrahmahatyāpahāriṇī ।। 121।।**

ब्रह्मेशविष्णुरूपा च बुद्धिर्विभववर्धिनी ।
**brahmeśaviṣṇurūpā ca buddhirvibhavavardhinī ।**
विलासिसुखदा वैश्या व्यापिनी च वृषारणिः ॥ १२२ ॥
**vilāsisukhadā vaiśyā vyāpinī ca vṛṣāraṇiḥ ।। 122।।**

वृषाङ्कमौलिनिलया विपन्नार्तिप्रभञ्जनी ।
**vṛṣāṅkamaulinilayā vipannārtiprabhañjanī ।**
विनीता विनता ब्रध्नतनया विनयान्विता ॥ १२३ ॥
**vinītā vinatā bradhnatanayā vinayānvitā ।। 123।।**

विपञ्ची वाद्यकुशला वेणुश्रुतिविचक्षणा ।
**vipañcī vādyakuśalā veṇuśrutivicakṣaṇā ।**
वर्चस्करी बलकरी बलोन्मूलितकल्मषा ॥ १२४ ॥
**varcaskarī balakarī balonmūlitakalmaṣā ।। 124।।**

विपाप्मा विगतातङ्का विकल्पपरिवर्जिता ।
**vipāpmā vigatātaṅkā vikalpaparivarjitā ।**
वृष्टिकर्त्री वृष्टिजला विधिर्विच्छिन्नबन्धना ॥ १२५ ॥
**vṛṣṭikartrī vṛṣṭijalā vidhirvicchinnabandhanā ।। 125।।**

व्रतरूपा वित्तरूपा बहुविघ्नविनाशकृत् ।

**vratarūpā vittarūpā bahuvighnavināśakṛt |**

वसुधारा वसुमती विचित्राङ्गी विभावसुः ॥ १२६ ॥

**vasudhārā vasumatī vicitrāṅgī vibhāvasuḥ || 126||**

विजया विश्वबीजं च वामदेवी वरप्रदा ।

**vijayā viśvabījaṁ ca vāmadevī varapradā |**

वृषाश्रिता विषघ्नी च विज्ञानोर्म्यंशुमालिनी ॥ १२७ ॥

**vṛṣāśritā viṣaghnī ca vijñānormyaṁśumālinī || 127||**

भव्या भोगवती भद्रा भवानी भूतभाविनी ।

**bhavyā bhogavatī bhadrā bhavānī bhūtabhāvinī |**

भूतधात्री भयहरा भक्तदारिद्र्यघातिनी ॥ १२८ ॥

**bhūtadhātrī bhayaharā bhaktadāridryaghātinī || 128||**

भुक्तिमुक्तिप्रदा भेशी भक्तस्वर्गापवर्गदा ।

**bhuktimuktipradā bheśī bhaktasvargāpavargadā |**

भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥ १२९ ॥

**bhāgīrathī bhānumatī bhāgyaṁ bhogavatī bhṛtiḥ || 129||**

भवप्रिया भवद्वेष्ट्री भूतिदा भूतिभूषणा ।

**bhavapriyā bhavadveṣṭrī bhūtidā bhūtibhūṣaṇā |**

भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥ १३० ॥

**bhālalocanabhāvajñā bhūtabhavyabhavatprabhuḥ || 130||**

भ्रान्तिज्ञानप्रशमनी भिन्नब्रह्माण्डमण्डपा ।

**bhrāntijñānapraśamanī bhinnabrahmāṇḍamaṇḍapā |**

भूरिदा भक्तिसुलभा भाग्यवद्दृष्टिगोचरी ॥ १३१ ॥

**bhūridā bhaktisulabhā bhāgyavaddṛṣṭigocarī || 131||**

भञ्जितोपप्लवकुला भक्ष्यभोज्यसुखप्रदा ।

**bhañjitopaplavakulā bhakṣyabhojyasukhapradā |**

भिक्षणीया भिक्षुमाता भावा भावस्वरूपिणी ॥ १३२ ॥

**bhikṣaṇīyā bhikṣumātā bhāvā bhāvasvarūpiṇī || 132||**

मन्दाकिनी महानन्दा माता मुक्तितरङ्गिणी ।

**mandākinī mahānandā mātā muktitaraṅgiṇī |**

महोदया मधुमती महापुण्या मुदाकरी ॥ १३३ ॥

**mahodayā madhumatī mahāpuṇyā mudākarī || 133||**

मुनिस्तुता मोहहन्त्री महातीर्था मधुस्रवा ।

**munistutā mohahantrī mahātīrthā madhusravā |**

माधवी मानिनी मान्या मनोरथपथातिगा ॥ १३४ ॥

**mādhavī māninī mānyā manorathapathātigā || 134||**

मोक्षदा मतिदा मुख्या महाभाग्यजनाश्रिता ।

**mokṣadā matidā mukhyā mahābhāgyajanāśritā |**

महावेगवती मेध्या महा महिमभूषणा ॥ १३५ ॥

**mahāvegavatī medhyā mahā mahimabhūṣaṇā || 135||**

महाप्रभावा महती मीनचञ्चललोचना ।

**mahāprabhāvā mahatī mīnacañcalalocanā |**

महाकारुण्यसम्पूर्णा महर्द्धिश्च महोत्पला ॥ १३६ ॥

**mahākāruṇyasampūrṇā maharddhiśca mahotpalā || 136||**

मूर्तिमन्मुक्तिरमणी मणिमाणिक्यभूषणा ।

**mūrtimanmuktiramaṇī maṇimāṇikyabhūṣaṇā |**

मुक्ताकलापनेपथ्या मनोनयननन्दिनी ॥ १३७ ॥

**muktākalāpanepathyā manonayananandinī || 137||**

महापातकराशिघ्नी महादेवार्धहारिणी ।

**mahāpātakarāśighnī mahādevārdhahāriṇī |**

महोर्मिमालिनी मुक्ता महादेवी मनोन्मनी ॥ १३८ ॥

**mahormimālinī muktā mahādevī manonmanī || 138||**

महापुण्योदयप्राप्या मायातिमिरचन्द्रिका ।

**mahāpuṇyodayaprāpyā māyātimiracandrikā |**

महाविद्या महामाया महामेधा महौषधम् ॥ १३९ ॥

**mahāvidyā mahāmāyā mahāmedhā mahauṣadham || 139||**

मालाधरी महोपाया महोरगविभूषणा ।

**mālādharī mahopāyā mahoragavibhūṣaṇā |**

महामोहप्रशमनी महामङ्गलमङ्गलम् ॥ १४० ॥

**mahāmohapraśamanī mahāmaṅgalamaṅgalam || 140||**

मार्तण्डमण्डलचरी महालक्ष्मीर्मदोज्झिता ।

**mārtaṇḍamaṇḍalacarī mahālakṣmīrmadojjhitā ǀ**

यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥ १४१ ॥

**yaśasvinī yaśodā ca yogyā yuktātmasevitā ǀǀ 141ǀǀ**

योगसिद्धिप्रदा याज्या यज्ञेशपरिपूरिता ।

**yogasiddhipradā yājyā yajñeśaparipūritā ǀ**

यज्ञेशी यज्ञफलदा यजनीया यशस्करी ॥ १४२ ॥

**yajñeśī yajñaphaladā yajanīyā yaśaskarī ǀǀ 142ǀǀ**

यमिसेव्या योगयोनिर्योगिनी युक्तबुद्धिदा ।

**yamisevyā yogayoniryoginī yuktabuddhidā ǀ**

योगज्ञानप्रदा युक्ता यमाद्यष्टाङ्गयोगयुक् ॥ १४३ ॥

**yogajñānapradā yuktā yamādyaṣṭāṅgayogayuk ǀǀ 143ǀǀ**

यन्त्रिताघौघसञ्चारा यमलोकनिवारिणी ।

**yantritāghaughasañcārā yamalokanivāriṇī ǀ**

यातायातप्रशमनी यातनानामकृन्तनी ॥ १४४ ॥

**yātāyātapraśamanī yātanānāmakṛntanī ǀǀ 144ǀǀ**

यामिनीशहिमाच्छोदा युगधर्मविवर्जिता ।

**yāminīśahimācchodā yugadharmavivarjitā ǀ**

रेवती रतिकृद् रम्या रत्नगर्भा रमा रतिः ॥ १४५ ॥

**revatī ratikṛd ramyā ratnagarbhā ramā ratiḥ ǀǀ 145ǀǀ**

रत्नाकरप्रेमपात्रं रसज्ञा रसरूपिणी ।

**ratnākarapremapātraṁ rasajñā rasarūpiṇī |**

रत्नप्रासादगर्भा च रमणीयतरङ्गिणी ॥ १४६ ॥

**ratnaprāsādagarbhā ca ramaṇīyataraṅgiṇī || 146||**

रत्नार्ची रुद्ररमणी रागद्वेषविनाशिनी ।

**ratnārcī rudraramaṇī rāgadveṣavināśinī |**

रमा रामा रम्यरूपा रोगिजीवातुरूपिणी ॥ १४७ ॥

**ramā rāmā ramyarūpā rogijīvāturūpiṇī || 147||**

रुचिकृद् रोचनी रम्या रुचिरा रोगहारिणी ।

**rucikṛd rocanī ramyā rucirā rogahāriṇī |**

राजहंसा रत्नवती राजत्कल्लोलराजिका ॥ १४८ ॥

**rājahaṁsā ratnavatī rājatkallolarājikā || 148||**

रामणीयकरेखा च रुजारी रोगरोषिणी ।

**rāmaṇīyakarekhā ca rujārī rogaroṣiṇī |**

राका रङ्कार्तिशमनी रम्या रोलम्बराविणी ॥ १४९ ॥

**rākā raṅkārtiśamanī ramyā rolambarāviṇī || 149||**

रागिणी रञ्जितशिवा रूपलावण्यशेवधिः ।

**rāgiṇī rañjitaśivā rūpalāvaṇyaśevadhiḥ |**

लोकप्रसूर्लोकवन्द्या लोलत्कल्लोलमालिनी ॥ १५० ॥

**lokaprasūrlokavandyā lolatkallolamālinī || 150||**

लीलावती लोकभूमिर्लोकलोचनचन्द्रिका ।
**līlāvatī lokabhūmirlokalocanacandrikā |**
लेखस्रवन्ती लटभा लघुवेगा लघुत्वहृत् ॥ १५१ ॥
**lekhasravantī laṭabhā laghuvegā laghutvahṛt || 151||**

लास्यत्तरङ्गहस्ता च ललिता लयभङ्गिगा ।
**lāsyattaraṅgahastā ca lalitā layabhaṅgigā |**
लोकबन्धुर्लोकधात्री लोकोत्तरगुणोर्जिता ॥ १५२ ॥
**lokabandhurlokadhātrī lokottaraguṇorjitā || 152||**

लोकत्रयहिता लोका लक्ष्मीर्लक्षणलक्षिता ।
**lokatrayahitā lokā lakṣmīrlakṣaṇalakṣitā |**
लीला लक्षितनिर्वाणा लावण्यामृतवर्षिणी ॥ १५३ ॥
**līlā lakṣitanirvāṇā lāvaṇyāmṛtavarṣiṇī || 153||**

वैश्वानरी वासवेड्या वन्ध्यत्वपरिहारिणी ।
**vaiśvānarī vāsaveḍyā vandhyatvaparihāriṇī |**
वासुदेवाङ्घ्रिरेणुघ्नी वज्रिवज्रनिवारिणी ॥ १५४ ॥
**vāsudevāṅghrireṇughnī vajrivajranivāriṇī || 154||**

शुभावती शुभफला शान्तिः शंतनुवल्लभा ।
**śubhāvatī śubhaphalā śāntiḥ śaṁtanuvallabhā |**
शूलिनी शैशववयाः शीतलामृतवाहिनी ॥ १५५ ॥
**śūlinī śaiśavavayāḥ śītalāmṛtavāhinī || 155||**

शोभावती शीलवती शोषिताशेषकिल्बिषा ।

**śobhāvatī śīlavatī śoṣitāśeṣakilbiṣā |**

शरण्या शिवदा शिष्टा शरजन्मप्रसूःशिवा ॥ १५६ ॥

**śaraṇyā śivadā śiṣṭā śarajanmaprasūḥśivā || 156||**

शक्तिः शशाङ्कविमला शमनस्वसृसम्मता ।

**śaktiḥ śaśāṅkavimalā śamanasvasṛsammatā |**

शमा शमनमार्गघ्नी शितिकण्ठमहाप्रिया ॥ १५७ ॥

**śamā śamanamārgaghnī śitikaṇṭhamahāpriyā || 157||**

शुचिः शुचिकरी शेषा शेषशायिपदोद्भवा ।

**śuciḥ śucikarī śeṣā śeṣaśāyipadodbhavā |**

श्रीनिवासश्रुतिः श्रद्धा श्रीमती श्रीः शुभव्रता ॥ १५८ ॥

**śrīnivāsaśrutiḥ śraddhā śrīmatī śrīḥ śubhavratā || 158||**

शुद्धविद्या शुभावर्ता श्रुतानन्दा श्रुतिस्तुतिः ।

**śuddhavidyā śubhāvartā śrutānandā śrutistutiḥ |**

शिवेतरघ्नी शबरी शाम्बरीरूपधारिणी ॥ १५९ ॥

**śivetaraghnī śabarī śāmbarīrūpadhāriṇī || 159||**

श्मशानशोधनी शान्ता शश्वच्छतधृतिस्तुता ।

**śmaśānaśodhanī śāntā śaśvacchatadhṛ tistutā |**

शालिनी शालिशोभाढ्या शिखिवाहनगर्भभृत् ॥ १६० ॥

**śālinī śāliśobhāḍhyā śikhivāhanagarbhabhṛt || 160||**

**शंसनीयचरित्रा च शातिताशेषपातका ।**

**śaṁsanīyacaritrā ca śātitāśeṣapātakā |**

**षड्गुणैश्वर्यसम्पन्ना षडङ्गश्रुतिरूपिणी ॥ १६१ ॥**

**ṣaḍguṇaiśvaryasampannā ṣaḍaṅgaśrutirūpiṇī || 161||**

**षण्ढताहारिसलिला स्त्यायन्नदनदीशता ।**

**ṣaṇḍhatāhārisalilā styāyannadanadīśatā |**

**सरिद्वरा च सुरसा सुप्रभा सुरदीर्घिका ॥ १६२ ॥**

**saridvarā ca surasā suprabhā suradīrghikā || 162||**

**स्वः सिन्धुः सर्वदुःखघ्नी सर्वव्याधिमहौषधम् ।**

**svaḥ sindhuḥ sarvaduḥkhaghnī sarvavyādhimahauṣadham |**

**सेव्या सिद्धिः सती सूक्तिः स्कन्दसूश्च सरस्वती ॥ १६३ ॥**

**sevyā siddhiḥ satī sūktiḥ skandasūśca sarasvatī || 163||**

**सम्पत्तरङ्गिणी स्तुत्या स्थाणुमौलिकृतालया ।**

**sampattaraṅgiṇī stutyā sthāṇumaulikṛtālayā |**

**स्थैर्यदा सुभगा सौख्या स्त्रीषुसौभाग्यदायिनी ॥ १६४ ॥**

**sthairyadā subhagā saukhyā strīṣusaubhāgyadāyinī || 164||**

**स्वर्गनिःश्रेणिका सूक्ष्मा स्वधा स्वाहा सुधाजला ।**

**svarganiḥśreṇikā sūkṣmā svadhā svāhā sudhājalā |**

**समुद्ररूपिणी स्वर्ग्या सर्वपातकवैरिणी ॥ १६५ ॥**

**samudrarūpiṇī svargyā sarvapātakavairiṇī || 165||**

स्मृताघहारिणी सीता संसाराब्धितरण्डिका ।

**smṛtāghahāriṇī sītā saṁsārābdhitaraṇḍikā ।**

सौभाग्यसुन्दरी सन्ध्या सर्वसारसमन्विता ॥ १६६ ॥

**saubhāgyasundarī sandhyā sarvasārasamanvitā ।। 166।।**

हरप्रिया हृषीकेशी हंसरूपा हिरण्मयी ।

**harapriyā hṛṣīkeśī haṁsarūpā hiraṇmayī ।**

हृताघसङ्घा हितकृद्धेला हेलाघगर्वहृत् ॥ १६७ ॥

**hṛtāghasaṅghā hitakṛddhelā helāghagarvahṛt ।। 167।।**

क्षेमदा क्षालिताघौघा क्षुद्रविद्राविणी क्षमा ।

**kṣemadā kṣālitāghaughā kṣudravidrāviṇī kṣamā ।**

इति नामसहस्रं हि गङ्गायाः कलशोद्भव ।

**iti nāmasahasraṁ hi gaṅgāyāḥ kalaśodbhava |**

कीर्तयित्वा नरः सम्यग्गङ्गास्नानफलं लभेत् ॥ १६८ ॥

**kīrtayitvā naraḥ samyaggaṅgāsnānaphalaṁ labhet || 168||**

सर्वपापप्रशमनं सर्वविघ्नविनाशनम् ।

**sarvapāpapraśamanaṁ sarvavighnavināśanam |**

सर्वस्तोत्रजपाच्छ्रेष्ठं सर्वपावनपावनम् ॥ १६९ ॥

**sarvastotrajapācchreṣṭhaṁ sarvapāvanapāvanam || 169||**

श्रद्धयाभीष्टफलदं चतुर्वर्गसमृद्धिकृत् ।

**śraddhayābhīṣṭaphaladaṁ caturvargasamṛddhikṛt |**

सकृज्जपादवाप्नोति ह्येकक्रतुफलं मुने ॥ १७० ॥

**sakṛjjapādavāpnoti hyekakratuphalaṁ mune || 170||**

सर्वतीर्थेषु यः स्नातः सर्वयज्ञेषु दीक्षितः ।

**sarvatīrtheṣu yaḥ snātaḥ sarvayajñeṣu dīkṣitaḥ |**

तस्य यत्फलमुद्दिष्टं त्रिकालपठनाच्च तत् ॥ १७१ ॥

**tasya yatphalamuddiṣṭaṁ trikālapaṭhanācca tat || 171||**

सर्वव्रतेषु यत्पुण्यं सम्यक्चीर्णेषु वाडव ।

**sarvavrateṣu yatpuṇyaṁ samyakcīrṇeṣu vāḍava |**

तत्फलं समवाप्नोति त्रिसन्ध्यं नियतः पठन् ॥ १७२ ॥

**tatphalaṁ samavāpnoti trisandhyaṁ niyataḥ paṭhan || 172||**

स्नानकाले पठेद्यस्तु यत्र कुत्र जलाशये ।

**snānakāle paṭhedyastu yatra kutra jalāśaye ।**

तत्र सन्निहिता नूनं गङ्गा त्रिपथगा मुने ॥ १७३ ॥

**tatra sannihitā nūnaṁ gaṅgā tripathagā mune ।। 173।।**

श्रेयोर्थी लभते श्रेयो धनार्थी लभते धनम् ।

**śreyorthī labhate śreyo dhanārthī labhate dhanam ।**

कामी कामानवाप्नोति मोक्षार्थी मोक्षमाप्नुयात् ॥ १७४ ॥

**kāmī kāmānavāpnoti mokṣārthī mokṣamāpnuyāt ।। 174।।**

वर्षं त्रिकालपठनाच्छ्रद्धया शुचिमानसः ।

**varṣaṁ trikālapaṭhanācchraddhayā śucimānasaḥ ।**

ऋतुकालाभिगमनादपुत्रः पुत्रवान् भवेत् ॥ १७५ ॥

**ṛtukālābhigamanādaputraḥ putravān bhavet ।। 175।।**

नाकालमरणं तस्य नाग्निचोराहिसाध्वसम् ।

**nākālamaraṇaṁ tasya nāgnicorāhisādhvasam ।**

नाम्नां सहस्रं गङ्गाया यो जपेच्छ्रद्धया मुने ॥ १७६ ॥

**nāmnāṁ sahasraṁ gaṅgāyā yo japecchraddhayā mune ।। 176।।**

गङ्गानामसहस्रं तु जप्त्वा ग्रामान्तरं व्रजेत् ।

**gaṅgānāmasahasraṁ tu japtvā grāmāntaraṁ vrajet ।**

कार्यसिद्धिमवाप्नोति निर्विघ्नो गेहमाविशेत् ॥ १७७ ॥

**kāryasiddhimavāpnoti nirvighno gehamāviśet ।। 177।।**

तिथिवारर्क्षयोगानां न दोषः प्रभवेत्तदा ।

**tithivārarkṣayogānāṁ na doṣaḥ prabhavettadā |**

यदा जप्त्वा व्रजेदेतत् स्तोत्रं ग्रामान्तरं नरः ॥ १७८ ॥

**yadā japtvā vrajedetat stotraṁ grāmāntaraṁ naraḥ || 178||**

आयुरारोग्यजननं सर्वोपद्रवनाशनम् ।

**āyurārogyajananaṁ sarvopadravanāśanam |**

सर्वसिद्धिकरं पुंसां गङ्गानामसहस्रकम् ॥ १७९ ॥

**sarvasiddhikaraṁ puṁsāṁ gaṅgānāmasahasrakam || 179||**

जन्मान्तरसहस्रेषु यत्पापं सम्यगर्जितम् ।

**janmāntarasahasreṣu yatpāpaṁ samyagarjitam |**

गङ्गानामसहस्रस्य जपनात्तत्क्षयं व्रजेत् ॥ १८० ॥

**gaṅgānāmasahasrasya japanāttatkṣayaṁ vrajet || 180||**

ब्रह्मघ्नो मद्यपः स्वर्णस्तेयी च गुरुतल्पगः ।

**brahmaghno madyapaḥ svarṇasteyī ca gurutalpagaḥ |**

तत्संयोगी भ्रूणहन्ता मातृहा पितृहा मुने ॥ १८१ ॥

**tatsaṁyogī bhrūṇahantā mātṛhā pitṛhā mune || 181||**

विश्वासघाती गरदः कृतघ्नो मित्रघातकः ।

**viśvāsaghātī garadaḥ kṛtaghno mitraghātakaḥ |**

अग्निदो गोवधकरो गुरुद्रव्यापहारकः ॥ १८२ ॥

**agnido govadhakaro gurudravyāpahārakaḥ || 182||**

महापातकयुक्तोऽपि संयुक्तोऽप्युपपातकैः ।

**mahāpātakayukto'pi saṁyukto'pyupapātakaiḥ ।**

मुच्यते श्रद्धया जप्त्वा गङ्गानामसहस्रकम् ॥ १८३ ॥

**mucyate śraddhayā japtvā gaṅgānāmasahasrakam ।। 183।।**

आधिव्याधिपरिक्षिप्तो घोरतापपरिप्लुतः ।

**ādhivyādhiparikṣipto ghoratāpapariplutaḥ ।**

मुच्यते सर्वदुःखेभ्यः स्तवस्यास्यानुकीर्तनात् ॥ १८४ ॥

**mucyate sarvaduḥkhebhyaḥ stavasyāsyānukīrtanāt ।। 184।।**

संवत्सरेण युक्तात्मा पठन् भक्तिपरायणः ।

**saṁvatsareṇa yuktātmā paṭhan bhaktiparāyaṇaḥ ।**

अभीप्सितां लभेत्सिद्धिं सर्वैः पापैः प्रमुच्यते ॥ १८५ ॥

**abhīpsitāṁ labhetsiddhiṁ sarvaiḥ pāpaiḥ pramucyate ।। 185।।**

संशयाविष्टचित्तस्य धर्मविद्वेषिणोऽपि च ।

**saṁśayāviṣṭacittasya dharmavidveṣiṇo'pi ca ।**

दाम्भिकस्यापि हिंस्रस्य चेतो धर्मपरं भवेत् ॥ १८६ ॥

**dāmbhikasyāpi hiṁsrasya ceto dharmaparaṁ bhavet ।। 186।।**

वर्णाश्रमपथीनस्तु कामक्रोधविवर्जितः ।

**varṇāśramapathīnastu kāmakrodhavivarjitaḥ ।**

यत्फलं लभते ज्ञानी तदाप्नोत्यस्य कीर्तनात् ॥ १८७ ॥

**yatphalaṁ labhate jñānī tadāpnotyasya kīrtanāt ।। 187।।**

गायत्र्ययुतजप्येन यत्फलं समुपार्जितम् ।

**gāyatryayutajapyena yatphalaṁ samupārjitam |**

सकृत्पठनतः सम्यक् तदशेषमवाप्नुयात् ॥ १८८ ॥

**sakṛtpaṭhanataḥ samyak tadaśeṣamavāpnuyāt || 188||**

गां दत्त्वा वेदविदुषे यत्फलं लभते कृती ।

**gāṁ dattvā vedaviduṣe yatphalaṁ labhate kṛtī |**

तत्पुण्यं सम्यगाख्यातं स्तवराजसकृज्जपात् ॥ १८९ ॥

**tatpuṇyaṁ samyagākhyātaṁ stavarājasakṛjjapāt || 189||**

गुरुशुश्रूषणं कुर्वन् यावज्जीवं नरोत्तमः ।

**guruśuśrūṣaṇaṁ kurvan yāvajjīvaṁ narottamaḥ |**

यत्पुण्यमर्जयेत्तद्भाग्वर्षं त्रिषवणं जपन् ॥ १९० ॥

**yatpuṇyamarjayettadbhāgvarṣaṁ triṣavaṇaṁ japan || 190||**

वेदपारायणात्पुण्यं यदत्र परिपठ्यते ।

**vedapārāyaṇātpuṇyaṁ yadatra paripaṭhyate |**

तत्षण्मासेन लभते त्रिसन्ध्यं परिकीर्तनात् ॥ १९१ ॥

**tatṣaṇmāsena labhate trisandhyaṁ parikīrtanāt || 191||**

गङ्गायाः स्तवराजस्य प्रत्यहं परिशीलनात् ।

**gaṅgāyāḥ stavarājasya pratyahaṁ pariśīlanāt |**

शिवभक्तिमवाप्नोति विष्णुभक्तोऽथवा भवेत् ॥ १९२ ॥

**śivabhaktimavāpnoti viṣṇubhakto'thavā bhavet || 192||**

यः कीर्तयेदनुदिनं गङ्गानामसहस्रकम् ।

**yaḥ kīrtayedanudinaṁ gaṅgānāmasahasrakam ।**

तत्समीपे सहचरी गङ्गादेवी सदा भवेत् ॥ १९३ ॥

**tatsamīpe sahacarī gaṅgādevī sadā bhavet ।। 193।।**

सर्वत्र पूज्यो भवति सर्वत्र विजयी भवेत् ।

**sarvatra pūjyo bhavati sarvatra vijayī bhavet ।**

सर्वत्र सुखमाप्नोति जाह्नवीस्तोत्रपाठतः ॥ १९४ ॥

**sarvatra sukhamāpnoti jāhnavīstotrapāṭhataḥ ।। 194।।**

सदाचारी स विज्ञेयः स शुचिस्तु सदैव हि ।

**sadācārī sa vijñeyaḥ sa śucistu sadaiva hi ।**

कृतसर्वसुरार्चः स कीर्तयेद्य इमां स्तुतिम् ॥ १९५ ॥

**kṛtasarvasurārcaḥ sa kīrtayedya imāṁ stutim ।। 195।।**

तस्मिंस्तृप्ते भवेत् तृप्ता जाह्नवी नात्र संशयः ।

**tasmiṁstṛpte bhavet tṛptā jāhnavī nātra saṁśayaḥ ।**

तस्मात्सर्वप्रयत्नेन गङ्गाभक्तं समर्चयेत् ॥ १९६ ॥

**tasmātsarvaprayatnena gaṅgābhaktaṁ samarcayet ।। 196।।**

स्तवराजमिमं गाङ्गं शृणुयाद्यश्च वै पठेत् ।

**stavarājamimaṁ gāṅgaṁ śṛṇuyādyaśca vai paṭhet ।**

श्रावयेदथ तद्भक्तान् दम्भलोभविवर्जितः ॥ १९७ ॥

**śrāvayedatha tadbhaktān dambhalobhavivarjitaḥ ।। 197।।**

मुच्यते त्रिविधैः पापैर्मनोवाक्कायसम्भवैः ।

**mucyate trividhaiḥ pāpairmanovākkāyasambhavaiḥ ।**

क्षणान्निष्पापतामेति पितॄणां च प्रियो भवेत् ॥ १९८ ॥

**kṣaṇānniṣpāpatāmeti pitṝṇāṁ ca priyo bhavet ।। 198।।**

सर्वदेवप्रियश्चापि सर्वर्षिगणसम्मतः ।

**sarvadevapriyaścāpi sarvarṣigaṇasammataḥ ।**

अन्ते विमानमारुह्य दिव्यस्त्रीशतसंवृतः ॥ १९९ ॥

**ante vimānamāruhya divyastrīśatasaṁvṛtaḥ ।। 199।।**

दिव्याभरणसम्पन्नो दिव्यभोगसमन्वितः ।

**divyābharaṇasampanno divyabhogasamanvitaḥ ।**

नन्दनादिवने स्वैरं देववत्स प्रमोदते ॥ २०० ॥

**nandanādivane svairaṁ devavatsa pramodate ।। 200।।**

भुज्यमानेषु विप्रेषु श्राद्धकाले विशेषतः ।

**bhujyamāneṣu vipreṣu śrāddhakāle viśeṣataḥ ।**

जपन्निदं महास्तोत्रं पितॄणां तृप्तिकारकम् ॥ २०१ ॥

**japannidaṁ mahāstotraṁ pitṝṇāṁ tṛptikārakam ।। 201।।**

यावन्ति तत्र सिक्थानि यावन्तोऽम्बुकणाः स्थिताः ।

**yāvanti tatra sikthāni yāvanto'mbukaṇāḥ sthitāḥ ।**

तावन्त्येव हि वर्षाणि मोदन्ते स्वपितामहाः ॥ २०२ ॥

**tāvantyeva hi varṣāṇi modante svapitāmahāḥ ।। 202।।**

यथा प्रीणन्ति पितरो गङ्गायां पिण्डदानतः ।

**yathā prīṇanti pitaro gaṅgāyāṁ piṇḍadānataḥ |**

तथैव तृप्नुयुः श्राद्धे स्तवस्यास्यानुसंश्रवात् ॥ २०३ ॥

**tathaiva tṛpnuyuḥ śrāddhe stavasyāsyānusaṁśravāt || 203||**

एतत्स्तोत्रं गृहे यस्य लिखितं परिपूज्यते ।

**etatstotraṁ gṛhe yasya likhitaṁ paripūjyate |**

तत्र पापभयं नास्ति शुचि तद्भवनं सदा ॥ २०४ ॥

**tatra pāpabhayaṁ nāsti śuci tadbhavanaṁ sadā || 204||**

अगस्ते किं बहूक्तेन शृणु मे निश्चितं वचः ।

**agaste kiṁ bahūktena śṛṇu me niścitaṁ vacaḥ |**

संशयो नात्र कर्तव्यः संदेग्धरि फलं नहि ॥ २०५ ॥

**saṁśayo nātra kartavyaḥ sandegdhari phalaṁ nahi || 205||**

यावन्ति मर्त्ये स्तोत्राणि मन्त्रजालान्यनेकशः ।

**yāvanti martye stotrāṇi mantrajālānyanekaśaḥ |**

तावन्ति स्तवराजस्य गाङ्गेयस्य समानि न ॥ २०६ ॥

**tāvanti stavarājasya gāṅgeyasya samāni na || 206||**

यावज्जन्म जपेद्यस्तु नाम्नामेतत्सहस्रकम् ।

**yāvajjanma japedyastu nāmnāmetatsahasrakam |**

स कीकटेष्वपि मृतो न पुनर्गर्भमाविशेत् ॥ २०७ ॥

**sa kīkaṭeṣvapi mṛto na punargarbhamāviśet || 207||**

नित्यं नियमवानेतद्यो जपेत्स्तोत्रमुत्तमम् ।

**nityaṁ niyamavānetadyo japetstotramuttamam |**

अन्यत्रापि विपन्नः स गङ्गातीरे मृतो भवेत् ॥ २०८ ॥

**anyatrāpi vipannaḥ sa gaṅgātīre mṛto bhavet || 208||**

एतत्स्तोत्रवरं रम्यं पुरा प्रोक्तं पिनाकिना ।

**etatstotravaraṁ ramyaṁ purā proktaṁ pinākinā |**

विष्णवे निजभक्ताय मुक्तिबीजाक्षरास्पदम् ॥ २०९ ॥

**viṣṇave nijabhaktāya muktibījākṣarāspadam || 209||**

गङ्गास्नानप्रतिनिधिः स्तोत्रमेतन्मयेरितम् ।

**gaṅgāsnānapratinidhiḥ stotrametanmayeritam |**

सिस्नासुर्जाह्नवीं तस्मादेतत्स्तोत्रं जपेत्सुधीः ॥ २१० ॥

**sisnāsurjāhnavīṁ tasmādetatstotraṁ japetsudhīḥ || 210||**

॥ इति श्रीस्कन्दमहापुराणे एकाशीतिसाहस्र्यां

**|| iti śrīskandamahāpurāṇe ekāśītisāhasryāṁ**

संहितायां चतुर्थे काशीखण्डे पूर्वार्धे

**saṁhitāyāṁ caturthe kāśīkhaṇḍe pūrvārdhe**

गङ्गासहस्रनामकथनं नामैकोनत्रिंशत्तमोऽध्यायः ॥

**gaṅgāsahasranāmakathanaṁ nāmaikonatriṁśattamo'dhyāyaḥ ||**